पौर्व्वाह्णिकः, त्रि, (पूर्व्वाह्ण + "विभाषा पूर्व्वाह्णापराह्णाभ्याम् ।" ४ । ३ । २४ । इति ठञ् ।) पूर्व्वाह्णे भवः । पूर्व्वाह्णसम्बन्धी । इति सिद्धान्तकौमुदी ॥

पौलस्ती, स्त्री, (पुलस्तेः अपत्यम् । पुलस्त + यञ् । ङीप् । यलोपः ।) शूर्पणखा । इति व्याकरणम् ॥

पौलस्त्यः, पुं, (पुलस्तेरपत्यमिति । पुलस्ति + गर्गादित्वात् यञ् ।) कुवेरः । इत्यमरः । १ । १ ।७२ ॥ रावणः । इति मेदिनी ॥ (यथा, हरिवंशे । ३३ । ३५ ।
"समीप एषः पौलस्त्यं पुलस्त्येनानुयाचितः ॥")
विभीषणः । इति शब्दरत्नावली ॥

पौलिः, पुं, (पोलतीति । पुल महत्त्वे + ज्वलादित्वात् णः । पौलेन निर्वृत्तः । सुतङ्गमादित्वात् इञ् ।) पाकावस्थागतकलायादिः । आरब्धपाकयवसर्षपादिः । वह्निना ईषद्दग्धपुट्पुट्शब्दवान् । इति केचित् । ईषद्दग्धः । इति श्रीधरः । इति भरतः ॥ तत्पर्य्यायः ॥ अपक्वम् २ अभ्यूषः ३ । इत्यमरः ॥ अभ्युषः ४ अभ्योषः ५ । इति भरतः ॥

पौलोमी, स्त्री, (पुलोम्नोऽपत्यमिति । पुलोमन् + अण् । अनो लोपः ।) शची । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । ७ । ६ ।
"विराजमानः पौलोम्या सहार्द्धासनया भृशम् ॥")

पौषः, पुं, (पौषी पौर्णमास्यस्मिन्निति । सास्मिन् पौर्णमासीत्यण् ।) वैशाखादिद्वादशमासान्तर्गतनवममासः । पुष्यनक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । तत्पर्य्यायः । तैषः २ सहस्यः ३ । इत्यमरः । पौषिकः ४ हैमनः ५ । इति राजनिर्घण्टः ॥ तिष्यः ६ तिष्यकः ७ । इति शब्दरत्नावली ॥ अयं धनुःस्थरविशारब्धशुक्लप्रतिपदादिदर्शान्तरूपो मुख्यचान्द्रः । कृष्णप्रतिपदादिपौर्णमास्यन्तरूपो गौणचान्द्रः । धनूराशिस्थरविकः सौरः । इति स्मृतिः ॥ * ॥ तत्र जातफलम् । यथा, कोष्ठीप्रदीपे ।

"निगूढमन्त्रः सुकृशाङ्गयष्टिः
परोपकारी पितृवित्तहीनः ।
कष्टान्वितार्थव्ययकृद्विधिज्ञः
पौषप्रसूतः पुरुषः सुधीरः ॥"

पौषी, स्त्री, (पुष्य + "नक्षत्रेण युक्तः ।" इत्यण् । तिष्यपुष्ययोरिति यलोपः ।) पुष्ययुक्ता पौर्णमासी । इत्यमरः ॥ पुष्येण युक्ता रात्रिः । इति मुग्धबोधव्याकरणम् ॥

पौष्करं, क्ली, (पुष्करस्येदमिति । पुष्कर + अण् ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो गुणाश्च यथा,—
"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥
पौष्करं कटुकन्तिक्तमुक्तं वातकफज्वरान् ।
हन्ति शोथारुचिश्वासान् विशेषात् पार्श्वशूलनुत् ॥"
अस्य प्रतिनिधिर्यथा,—
"पौष्कराभावतः कुष्ठम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पौष्करमूलं, क्ली, (पौष्करं मूलम् ।) पुष्करमूलम् । यथा,—
"मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ।"
इत्यमरः ॥
"त्रीणि पुष्करमूले । पुष्करं सुगन्धिद्रव्यं वणिक्ख्यातं तस्य इदं पौष्करं यः पौष्करे मूले पुष्करादीत्यन्वयः ।" इति भरतः ॥

पौष्करिणी, स्त्री, (पौष्करं पुष्कराणां समूहोऽस्या अस्तीति । पौष्कर + इनि । स्त्रियां ङीप् ।) पुष्करिणी । इति शब्दरत्नावली ॥

पौष्टिकं, क्ली, (पुष्टेः वृद्धेः हितमिति । पुष्टि + ठञ् ।) क्षौरसमये गात्राच्छादनवस्त्रविशेषः । कावाइ इति भाषा ॥ अस्य गुणाः । धनचिह्नत्वम् । आयुष्यत्वम् । शुचित्वम् । रूपविराजनत्वञ्च । इति राजवल्लभः ॥ धन्यं धनचिह्नम् । बल्यमिति वा पाठः । पुष्टिर्धनजनादीनां वृद्धिरित्यभिधीयते । तद्धेतुभूतं कर्म्म । इति दुर्गाभक्तः ॥ (पुष्टिहिते, त्रि । यथा, महाभारते । १२ । २६६ । २६ ।
"सतां वृत्तमधिष्ठाय निहीनानुज्झिहीर्षवः ।
मन्त्रवर्ज्जं न दुष्यन्ति कुर्व्वाणाः पौष्टिकीः
क्रियाः ॥")

पौष्पं, त्रि, (पुष्पेण निर्वृत्तम् । पुष्पस्येदं वेति । पुष्प + अण् ।) पुष्पनिर्म्मितम् । पुष्पसम्बन्धि । यथा, कालिकापुराणे ६७ अध्याये ।
"आसनं प्रथमं दद्यात् पौष्पं दारुजमेव वा ।
वास्त्रं वा चार्म्मणं कौशं मण्डलस्योत्तरे न्यसेत् ॥"

पौष्पकं, क्ली, (पुष्पेण कायतीति । कै + कः । पुष्पक + स्वार्थे अण् ।) कुसुमाञ्जनम् । इत्यमरः ॥

पौष्पी, स्त्री, (पुष्पस्य इयं इति । पुष्प + अण् । गौरादित्वात् ङीष् । पुष्पाख्यया प्रसिद्धत्वात् तथात्वम् ।) देशविशेषः । यथा,—
"अथ पुष्पपुरं पौष्पी तथा पाटलिपुत्त्रकम् ॥"
इति शब्दरत्नावली ॥

पौष्यः, पुं, (पूष्णोऽपत्यमिति । पूषन् + ष्यञ् ।) पूषपुत्त्रः । स च करवीरपुरस्य राजा । तस्य पुत्त्रः शिवांशजचन्द्रशेखरः । यथा,—
"पूष्णः पुत्त्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
स पुत्त्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ॥
ततः पुत्त्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
भक्षदत्तफलं हस्ते कृत्वेदं तमुवाच ह ॥
इदं फलं त्वया दत्तं विभज्य नृपते ! त्रिधा ।
भोजयेस्ताः स्वजायास्त्वं प्रहृष्टः शुद्धमानसः ॥
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ।
तत्प्रभावात्तत् फलं भूतं त्रिभागं स्वयमेव हि ॥
ततः समुचिते काले प्राशे ताभिस्तु भक्षितम् ।
तत् फलं नृपशार्दूल ! गर्भाश्चाप्याहिताः शुभाः ॥
सम्पूर्णे गर्भकाले तु गर्भभ्दः समजायत ।
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ॥
तच्च खण्डत्रयं पौष्यो यथास्थानं नियोज्य च ।
एकं पिण्डं चकाराशु तत्र पुत्त्रो व्यजायत ॥
तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः ।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रमसः समः ॥
ब्रह्मावर्त्ताह्वये रम्ये करवीराह्वये पुरे ।
दृषद्वतीनदीतीरे राजा भूत्वा मुमोद ह ॥"
इति कालिकापुराणे ४६ अध्यायात् सङ्कलितः ॥
(नृपभेदः । स तु गुरुदक्षिणार्थमागताय उतङ्काय कुण्डले दत्तवान् । यथा, महाभारते । १ । ३ । ११२ ।
"ततस्तं पौष्यः प्रत्युवाच भगवंश्चिरेण पात्रमासाद्यते भवांश्च गुणवानतिथिस्तदिच्छे श्राद्धं कर्त्तुं क्रियतां क्षण इति ।" एतद्विशेषविवरणन्तु तत्रैव द्रष्टव्यम् ।)

प्याट्, व्य, हे । भोः । इत्यमरः । ३ । ४ । ७ ॥

प्याय, ओ ई ङ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ओ ई, पीनं मुखम् । उपसर्गात्तु प्रप्यानम् । अस्वाङ्गे तु प्यानः पीनः स्वेदः । ङ, प्यायते । इति दुर्गादासः ॥

प्युष, क उत्सर्गे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) अन्तःस्थाद्ययुक्तः । उत्सर्गे उत्सर्गे । क, प्योषयति धनं दाता । इति दुर्गादासः ॥

प्युष, य इर् भागे । दाहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) अन्तःस्थाद्ययुक्तः । य, पुष्यति धनं दायादः । इर्, अप्युषत् अप्योषीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

प्युस, य इर् विभागे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट ।) अन्तःस्थाद्ययुक्तः । य, प्युस्यति धनं दायादः । इर्, अप्युसत् अप्योसीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

प्यै, ङ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट् ।) अन्तःस्थाद्ययुक्तः । ङ, प्यायते । इति दुर्गादासः ॥

प्र, व्य, (प्रथयतीति । प्रथ + डः ।) विंशत्युपसर्गान्तर्गतप्रथमोपसर्गः । अस्यार्थाः । गतिः । आरम्भः । उत्कर्षः । सर्व्वतोभावः । प्राथम्यम् । ख्यातिः । उत्पत्तिः । व्यवहारः । इति दुर्गादासधृतपुरुषोत्तमः ॥

प्रकटं, त्रि, (प्रकटतीति । प्र + कट + अच् ।) स्पष्टम् । अस्य पर्य्यायः प्रकाशशब्दे द्रष्टव्यः ।
"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते ।"
इति भागवतामृतम् ॥
(यथा च, देवीभागवते । १ । ७ । ३८ ।
"जानन्ति ये न तव देवि ! परं प्रभावं
ध्यायन्ति ते हरिहरावपि मन्दचित्ताः ।
ज्ञातं मयाद्य जननि ! प्रकटं प्रमाणं
यद्विष्णुरप्यतितरां विवशोऽद्य शेते ॥")

प्रकटितं, त्रि, (प्र + कट + क्त ।) प्रकाशितम् । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । १ । ७ । ४४ ।